(1)

शिरोस्त्रियां १९ वसंतेपुष्पसमयः सुरभिर्ग्रीष्मऊष्मकः निदाघउष्णोपगमउष्णउष्मा
गमस्तपः २० स्त्रियांप्रावृट्स्त्रियांभूम्निवर्षाअथशरत्स्त्रियां षडमीऋतवःपुंसि
मार्गादीनांयुगैःक्रमात् २१ संवत्सरोवत्सरोब्दोहायनोस्त्रीशरत्समाः आपः सुम
नसोवर्षाअप्सरःसिकतास्समाः एतास्त्रियांबहुत्वेस्युरेकत्वेप्युत्तरंत्रिकं मासेन
स्यादहोरात्रः पैत्रोवर्षेणदैवत २३ दैवेयुगसहस्रेद्वेब्राह्मः कल्पौतुतौनृणां
मन्वंतरंतुदिव्यानांयुगानामेकसप्ततिः २४ संवर्तः प्रलयः कल्पःक्षयःकल्पांत
इत्यपि अस्त्रीपंकंपुमान्पाप्मापापं किल्बिषकल्मषं २५ कलुषंवृजिनैनोघ
मंहोदुरितदुष्कृतं स्याद्धर्ममस्त्रियांपुण्यश्रेयसीसुकृतंवृषः २६ मुत्प्रीतिः
प्रमदोहर्षःप्रमोदामोदसंमदाः स्यादानंदथुरानंदशर्मशातसुखानिच २७

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

अमर श्वश्श्रेयसंशिवंभद्रंकल्याणंमंगलंशुभं स्यमानंदथुरानंदशर्मशांतसुखानिच भावु
९ भावुकंभविकंभव्यंकुशलंक्षेममस्त्रियां शस्तंचाथत्रिषुद्रव्येपापंपुण्यंसुखादिच २८
मत्तल्लिकामचर्चिकाप्रकांडमुख्यतल्लजो २९ प्रशस्तवाचिकान्यमून्ययः शुभावहोविधिः
दैवंदिष्टंभागधेयंभाग्यंस्त्रीनयतिर्विधिः ३० हेतुर्नाकारणंबीजंनिदानंत्वादिकारणं
(२) क्षेत्रज्ञआत्मापुरुषप्रधानंप्रकृतिःस्त्रियां ३१ विशेषःकालिकोवस्थागुणाःसत्वंरजस्त
मः जनुर्जननजन्मानिजनिरुत्पत्तिरुद्भवः ३२ प्राणीतुचेतनोजन्मीजंतुर्जन्युशरीरि
णः जातिर्जातंचसामान्यंव्यक्तिस्तुपृथगात्मता ३३ चित्तंतुचेतोहृदयंस्वांतंहृन्मान
संमनः इतिकालवर्गः बुधिर्मनीषाधिषणाधीःप्रज्ञाशेमुषीमतिः प्रेक्षोपलब्धि
श्चित्संवित्प्रतिपज्ज्ञप्तिचेतनाः धीर्धारणावतीमेधासंकल्पःकर्ममानसं चित्ताभोगोम
नस्कारश्चर्चासंख्याविचारणा अध्याहारस्तर्कऊहोविचिकित्सातुसंशयः। २। ४
वासनाभावनासंस्कारोनुभूताद्यविस्मृतिः ॥४

स्यात्संकेतुरूकसमयोभ्रातिपर्यायहस्तदा

(2A) अध्याहारस्तर्कऊहोविचिकित्सातुसंशयः संदेहद्वापरौचाथसमौनिर्णयनिश्चयौ ३
मिथ्यादृष्टिर्नास्तिकताव्यापादोद्रोहचिंतनं समौसिद्धांतराद्धांतौभ्रांतिर्मिथ्याम
तिर्भ्रमः ४ संविदागूः प्रतिज्ञानंनियमाश्रवसंश्रवाः अंगीकारोभ्युपगमः प्र
तिश्रवसमाधयः ५ मोक्षेधीर्ज्ञानमन्यत्रविज्ञानंशिल्पशास्त्रयोः मुक्तिःकै
वल्यनिर्वाणश्रेयोनिःश्रेयसामृतं ६ मोक्षोपवर्गोथाज्ञानमविद्याहंमतिःस्त्रि
यां ७ रूपंशब्दोगंधरसः स्पर्शश्चविषयाअमी ७ गोचराइंद्रियार्थाश्च
हृषीकं हृषीकंविषयींद्रियं कर्मेंद्रियंतुपाय्वादिमनोनेत्रादिधींद्रियं ८
२ तुवरोस्तुकषायोस्त्रीमधुरोलवणःकटुः तिक्तोम्लश्चरसाःपुंसितद्वत्सु

" Joint Project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(3)

अमर षड्मीत्रिषु २ विमर्दोत्थे परिमलो गंधे जनमनोहरे आमोदः सोतिनिर्हारी वाच्य
१० लिंगत्वमागुणात् १० समाकर्षी तु निर्हारी सुरभिर्घ्राणतर्पणः इष्टगंधः सुगंधी स्या
धी दामोदी मुखवासनः ११ पूतिगंधिस्तु दुर्गंधो विश्रं स्यादामगंधि यत् शुक्लशुभ्रशु
चिश्वेतविशदः श्येतपांडुराः १२ अवदातः सितो गौरोवलक्षो धवलोर्जुनः हरि
णः पांडुरः पांडुरीषत्पांडुस्तु धूसरः १३ कृष्णे नीलासितश्यामकालश्यामलमेचकाः
भरुत्र पीतो गौरो हरिद्राभः पालाशो हरितो हरित् १४ लोहितो रोहितो रक्तः शोणः कोक
नदच्छविः अव्यक्तरागस्त्वरुण श्वेतरक्तस्तु पाटलः १५ श्यावः स्यात्कपिशो धूम्रधू
ते मलो कृष्णलोहिते कडारः कपिलः पिंगः पिशंगौ कद्रुपिंगलौ १६ चित्रं किर्मीरकल्मा १०
षशबलैताश्च कर्बुरे गुणे शुक्लादयः पुंसि गुणिलिंगास्तु तद्वति १७ इति धीवर्गः॥

हुं २

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan Mumbai

× सर्गश्च प्रतिसर्गश्च वंशो मन्वंतराणि च ॥ वंशानुचरितं चेति लक्षणानां तु पंचकं ॥ ९
~~[illegible]~~

(3A) श्रीः ॥ इति धीवर्गः ॥ ब्राह्मी गौर्भारती भाषा गीर्वाग्वाणी सरस्वती ॥ व्याहार उक्तिर्लपितं भा
षितं वचनं वचः ॥ १ ॥ अपभ्रंशोऽपशब्दः स्याच्छास्त्रे शब्दस्तु वाचकः ॥ तिङ्सुबंतचयो वा
क्यं क्रिया वा कारकान्विता ॥ २ ॥ श्रुतिः स्त्री वेद आम्नायस्त्रयी धर्मस्तु तद्विधिः ॥ स्त्रि
याम् ऋक्सामयजुषी इति वेदास्त्रयस्त्रयी ॥ ३ ॥ शिक्षेत्यादि श्रुतेरंगमोंकारप्रणवौ
समौ ॥ इतिहासः पुरावृत्तमुदात्ताद्यास्त्रयः स्वराः ॥ ४ ॥ आन्विक्षिकी दंडनीतिस्तर्क क्ष
विद्यार्थशास्त्रयोः ॥ आन्विक्षिकी त्रयी वार्ता दंडनीतिश्च शाश्वती ॥ आन्विक्षिक्यां तु
विद् ज्ञानं धर्माधर्मं त्रयीस्थितौ ॥ ५ ॥ अर्थानर्थौ तु वार्तानां दंडनित्यां नयानयौ ॥ आ
न्वीक्षिकी दंडनीतिस्तर्कविद्यार्थशास्त्रयोः ॥ ६ ॥ आख्यायिकोपलब्धार्था पुराणं
कथा पंचलक्षणं ॥ प्रबंधकल्पना कथा प्रवल्हिका प्रहेलिका ॥ ७ ॥ स्मृतिस्तु धर्म
संहिता समाहृतिस्तु संग्रहः ॥ समस्या तु समासार्था किंवदंती जनश्रुतिः ॥ ८ ॥ ती ३
वार्ता प्रवृत्तिर्वृत्तांत उदंतः स्यादथाह्वयः ॥ आख्याह्वे अभिधानं च नामधेयं
× शिक्षा व्याकरणं छंदः निरुक्तं ज्योतिषं तथा कल्पश्चेति षडंगानि वेदस्याहुर्मनीषिणः ॥ ५

प्रणिपातोनमस्कारप्रणामोवंदनंनतिः॥

अमर चनामच॥ ९॥ हूतिराकारणाह्वानेसंहूतिर्बहुभिःकृता॥ विवादोव्यवहारःस्यादुप
११ न्यासस्तुवाङ्मुखं १० उपोद्घातउदाहारःशपनंशपथःपुमान्॥ प्रश्नोनुयोगःपृच्छा
चप्रतिवाक्योत्तरेसमे ११ मिथ्याभियोगोभ्याख्यानमथमिथ्याभिशंसनं
अभिशापःप्रणादस्तुशब्दःस्यादनुरागजः १२ यशःकीर्तिःसमाख्याचस्तव
नु स्तोत्रंस्तुतिर्नुतिः आम्रेडितंद्विस्त्रिरुक्तमुच्चैर्घुष्टंतुघोषणा १३ काकुःस्त्रियांवि
कारोयःशोकभीत्यादिभिर्ध्वनेः अवर्णाक्षेपनिर्वादपरिवादापवादवत्
१४ उपक्रोशोजुगुप्साचकुत्सानिंदाचगर्हणे पारुष्यमतिवादःस्याद्भर्त्सनं मपवादे
वोह्रगीः त्वपकारगीः १५ यःसनिंदउपालंभस्तत्रस्यात्परिभाषणं तत्रत्वाक्षार
णायस्यादाक्रोशोमैथुनंप्रति १६ स्यादाभाषणमालापःप्रलापोनर्थकंव ११
चः अनुलापोमुहुर्भाषाविलापःपरिदेवनं १७ विप्रलापोविरोधोक्तिः

गर्हणा

(6A)

सल्लापोभाषणंमिथः सुप्रलापःसुवचनमपलापस्तुनिह्नवः १८ चोद्यमाक्षेपाभियो
गौशापाक्रोशौदुरेषणा। अस्मरीचाटुचटुश्लाघाप्रेममिथ्याविकत्थनं १९
संदेशवाग्वाचिकंस्याद्वाग्भेदास्तुत्रिषूत्तरे रुषतीवागकल्याणीस्यात्कल्या रुशा।
रे ल्यातुशुभात्मिका २० अत्यर्थमधुरंसांत्वंसंगतंहृदयंगमं निष्ठुरंपरु
षंग्राम्यमश्लीलंसूनृतंप्रिये २१ सत्येथसंकुलक्लिष्टेपरस्परपराहते
लुप्तवर्णपदंग्रस्तंनिरस्तंत्वरितोदितं २२ अंबूकृतंसनिष्ठीवमबद्धंस्या
दनर्थकं अनक्षरमवाच्यंस्यादाहतंतुमृषार्थकं २३ सोल्लुंठनंतुसोत्प्रा
म संमणितंरतिकूजितं २४ × अथक्लिष्टमविस्पष्टंवितथंत्वनृतंवचः ×
मो सत्यंतथ्यमृतंसम्यगमूनित्रिषुतद्वति श्राव्यंहृद्यंमनोहारिविस्पष्टंप्र
कटोदितं २५ शब्देनिनादनिनदध्वनिध्वानरवस्वनाः स्वाननिर्घो

इतिवाग्वर्गः

(5)

रावर

अम· षनि[illegible]ह्रादनादनिस्वाननिस्वनाः २६ आरवारावसंराववरावा अथम

१२ र्मरः स्वनितेवस्त्रपर्णानांभूषणानांतुसिंजितं २७ निक्वाणोनिक्वणः

क्वाणः क्वणः क्वणनमित्यपि वीणायाः क्वणितेप्रादेः प्रक्वाणः प्रक्वणादयः

२८ कोलाहलः कलकलस्तिरश्चांवाशितंरुतं स्त्रीप्रतिश्रुत्प्रतिध्वाने

गीतंगानमिमेसमे २९ ॥इतिशब्दादिवर्गः॥ ५ निषादर्षभगां

धारषड्जमध्यमधैवताः पंचमश्चेत्यमीसप्ततंत्रीकंठोत्थितास्वराः १

षड्जंमयूराब्रुवतेगावश्चर्षभभाषिणः अजाविकंतुगांधारंक्रौंचः

क्वणतिमध्यमः २ पुष्पसाधारणेकालेपिकःकूजतिपंचमं धैवतं

ह्रेषतेवाजीनिषादंबृंहतेगजः ३ नासाकंठमुरस्तालुजिह्वादंतांश्चसं १२

स्पृशन् षड्भ्यःसंजायतेयस्मात्तस्मात्षड्जइतिस्मृतं ४ काकली

(5A)

तु कले सूक्ष्मे ध्वनौ तु मधुरास्फुटे कलो मंद्रस्तु गंभीरे तारोत्युच्चैस्त्रयस्त्रिषु
५ समन्वितलयस्त्वेकतालो वीणा तु वल्लकी विपंची सा तु तंत्रीभिः स
प्तभिः परिवादिनी ६ ततं वीणादिकं वाद्यमानद्धं मुरजादिकं वंशा
दिकं तु सुषिरं कांस्यतालादिकं घनं ७ चतुर्विधमिदं वाद्यं वादित्रा
तोद्यनामकं मृदंगा मुरजा भेदास्त्वंक्यालिंग्योर्ध्वकास्त्रयः ८ स्या
द्यशःपटहो ढक्का भेर्यामानकदुंदुभिः आनकः पटहोस्त्री यात्को
णो वीणादिवादनं ९ वीणादंडः प्रवालः स्यात्ककुभस्तु प्रसेवकः
कोलंबकस्तु कायोस्या उपनाहो निबंधनं १० वाद्यप्रभेदा डमरुम

Joint property of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

अमर० डुडिंडिमझर्झराः मर्द्दलः पणवोन्येचनर्तकीलासिकेसमे ११ विलंबितं
१२ द्रुतंमध्यंतत्वमोघोघनंक्रमात् तालःकालक्रियामानंलयःसाम्यमथा
स्त्रियां १२ तांडवंनटनंनाट्यंलास्यंनृत्यंचनर्तने तौर्यत्रिकंनृत्यगी
तंवाद्यंमिदंत्रयं १३ भ्रकुंसश्चभ्रूकुंसश्चभ्रूकुंसश्चेतिनर्तकः स्त्रीवेष
धारीपुरुषोनाट्योक्तौगणिकाज्जुका १४ भगिनीपतिरावुत्तोभावोवि
द्वानथावुकः जनकोयुवराजस्तुकुमारोभर्तृदारकः १५ राजाभट्टार
कोदेवस्तत्सुताभर्तृदारिका देवीकृताभिषेकायामितरासुतुभट्ट
नी १६ अब्रह्मण्यमवध्योक्तौराजश्यालस्तुराष्ट्रियः अंबामाताथबा
लास्याद्वासूरार्यस्तुमारिषः १७ अत्तिकाभगिनीज्येष्ठानिष्ठानिर्वह १३

स्तंभः स्वेदोथरोमांचस्वरभंगोथवेपथुः वैवर्ण्यमश्रुप्रलयइत्यष्टौसात्विकागुणाः १७

(6A) पोस्मि हंडे हंजेहल्लाह्वानेनिचांचेटीसखींप्रति १८ अंगहारोंगविक्षेपो व्यंजका
भिनयोसमौ निर्वृत्ते त्वंगसत्वाभ्यां द्वे त्रिधांगिकसात्विके १९ शृंगारवीर
करुणाद्भुतहास्यभयानकाः भीवत्सरौद्रौचरसाः शृंगारः शुचिरुज्वलः २०
उत्साहवर्धनोवीरः कारुण्यंकरुणाघृणा कृपादयानुकंपास्यादनुक्रोशोप्यथोहसः
२१ हासोहास्यंचबीभत्संविकृतंत्रिष्विदंद्वयं विस्मयोद्भुतमाश्चर्यंचित्रमप्यथभैरवं २२
दारुणंभीषणंभीष्मंघोरंभीमभयानकं भयंकरंप्रतिभयंरौद्रंत्वुग्रममीत्रिषु २३
चतुर्दशदरस्त्रासोभीतिर्भीःसाध्वसंभयं विकारोमानसोभावोनुभावोभावबोधकः
२४ गर्वोभिमानोहंकारोमानश्चित्तसमुन्नतिः अनादरःपरिभवःपरीभावस्तिरस्क्रिया २५
रीढावमाननावज्ञावहेलनमसूर्क्षणं मंदाक्षंह्रीस्त्रपाव्रीडालज्जासापत्रपान्यतः २६

(7)

अमर
१४

क्षांतिस्तितिक्षाभिध्यातुपरस्वविषयेस्पृहा अक्षांतिरीर्ष्यासूयातुदोषारोपोगुणेष्वपि २७
वैरंविरोधोविद्वेषोमन्युशोकौतुशुक्स्त्रियां पश्चात्तापोनुतापश्चविप्रतीसारइत्यपि २८
कोपक्रोधामर्षरोषप्रतिघारुट्क्रुधौस्त्रियौ शुचौतुचरितेशीलमुन्मादश्चित्तविभ्रमः २९
प्रेमानाप्रियताहार्दंप्रेमस्नेहोथदोहदं इच्छाकांक्षास्पृहेहातृड्वांछालिप्सामनोरथः ३०
कामोभिलाषस्तर्षश्चसोत्यर्थंलालसाद्वयोः उपाधिर्नाधर्मचिंतापुंस्याधिर्मानसीव्यथा ३१
स्याच्चिंतास्मृतिराध्यानमुत्कंठोत्कलिकेसमे उत्साहोध्यवसायःस्यात्सवीर्यमतिशक्तिभाक्
३२ कपटोस्त्रीव्याजदंभोपधयश्छद्मकैतवे कुसृतिर्निकृतिःशाठ्यंप्रमादोनवधानता ३३ कौतू
हलंकौतुकंचकुतुकंचकुतूहलं स्त्रीणांविलासविब्बोकविभ्रमाललितंतथा ३४ हेला
लीलेत्यमीहावाःक्रियाःशृंगारभावजाः द्रवकेलिपरिहासाःक्रीडालीलाचनर्मच ३५
लीलाविलासोविच्छित्तिर्विभ्रमःकिलकिंचितं मोट्टायितंकुट्टमितंविब्बोकोललितंतथा

१४

(7A)

विछतंचेतिविज्ञेयास्त्रीणांचेष्टास्वभावजा ३६ द्रवकेलिपरीहासाः क्रीडालीलाच
नर्मच व्याजोपदेशोलक्षंचक्रीडाखेलाचकुर्दनं ३७ घर्मोनिदाघः स्वेदस्या
त्प्रलयोनष्टचेष्टता अवहित्थाकारगुप्तिस्समौसंवेगसंभ्रमौ ३८ स्यादाछुरितकं
हासः सोत्प्रासस्समनाक्स्मितं मध्यमः स्याद्विहसितंरोमांचोरोमहर्षणं ३९ ॥
क्रंदितंरुदितंक्रुष्टंजृंभस्तुत्रिषुजृंभणं विप्रलंभोविसंवादोरिंखणंस्खलनं
समे ४० स्यान्निद्राशयनंस्वापः स्वप्नः संवेशइत्यपि तंद्रीप्रमीलाभ्रुकुटि
र्भ्रूकुटिर्भृकुटिस्त्रियां ४१ अदृष्टिस्यादसौम्येक्षिसंसिद्धिप्रकृतीत्विते स्व
रूपंचस्वभावश्चनिसर्गश्चाथवेपथुः ४२ कंपोथक्षणउद्धर्षोमहउद्धवउ
त्सवः प्राकृताद्रापूर्ववर्गस्याच्चन्मतंवैक्षीरस्वामितं ४४ इतिनाट्यवर्ग॥
अधोभुवनपातालबलिसद्मरसातलं नागलोकोथकुहरंसुषिरंविवरं

(४)

अमर० बिलं १ छिद्रं निर्व्यथनं रोकं रंध्रं चात्र वपा शुषिः गर्तावटौ भुविश्वभ्रे सरंध्रे

१५ सुषिरं त्रिषु २ अंधकारोस्त्रियां ध्वांतं तमिस्रं तिमिरं तमः ध्वांते गाढध्वांत

मसंक्षीणावतमसं तमः ३ विश्वक्सं तमसं नागाः काद्रवेयास्तदीश्वराः

शेषोनंतो वासुकिस्तु सर्पराजोथ गोनसे ४ तिलित्सः स्यादजगरे शयुर्वाहस

इत्युभौ अलगर्दो जलव्यालः समौ राजिलडुंडुभौ ५ मालुधानो मातुलाहि

र्निर्मुक्तो मुक्तकंचुकः सर्पः पृदाकुर्भुजगो भुजंगो हिर्भुजंगमः ६ आशी

विषो विषधरश्चक्री व्यालः सरीसृपः कुंडली गूढपाच्चक्षुःश्रवाः काकोदरः

फणी ७ दर्वीकरो दीर्घपृष्ठो दंदशूको बिलेशयः उरगः पन्नगो भोगी जिह्मगः

पवनाशनः ८ त्रिष्वाहेयं विषास्थ्यादि स्फटायां तु फणा द्वयोः समौ कंचुक

निर्मोकौ क्ष्वेडस्तु गरलं विषं ९ पुंसि क्लीबे च काकोलकालकूटहलाहलाः॥ १५

सौराष्ट्रिकः शौक्लिकेयो ब्रह्मपुत्रप्रदीपनः १० दारदो वत्सनाभश्च विषभेदा अ

(8A)

मीनव विषवैद्योजांगुलिकोव्याळग्राह्याहितुंडिकः ११ इतिपाताळवर्गः॥
स्यान्नारकस्तुनरकोनिरयोदुर्गतिस्त्रियां तद्भेदास्तपनावीचिमहारौरवरौ
रवाः १ संहारकाळसूत्रंचसंघातस्त्वासुनारकाः प्रेतावैतरणीसिंधुः
स्यादळक्ष्मीस्तुनिर्ऋतिः २ विष्टिराजूः कारणातुयातनातिव्रवेदना
पीडाबाधाव्यथादुःखमामनस्यंप्रसूतिजं ३ स्यात्कष्टंकृच्छ्रमाभीळं
त्रिष्वेषांभेद्यगामियत् ४ इतिनरकवर्गः ९ समुद्रोब्धिरकूपारः
पारावारःसरित्पपतिः उदन्वानुदधिःसिंधुःसरस्वान्सागरोर्णवः
१ रत्नाकरोजलनिधिर्यादःपतिरपांपतिः तस्यप्रभेदाःक्षारोदो
लवणोदःस्तथापरे २ क्षीरोदोलवणोदश्चेक्षुदश्चसुदश्चघृतोदकः॥

(१)

अमर स्वादुदकस्क्षीरोदश्च तथा चोदधीर सोदधी। ३ आपस्त्री भूम्नि वा वारि सलिलं
२५ जलं पयः कीलालममृतं जीवनं भुवनं वनं ४ कबंधमुदकं पाथः पुष्करं स
र्वतोमुखं अंभोर्णस्तोय पानीयनीरक्षीरांबुशंबरं ५ मेघपुष्पं घनरसस्त्रि
षु द्वे आप्यमंमयं भंगस्तरंग उर्मिर्वा स्त्रियां वीचिरथोर्मिषु ६ महत्सूल्लोल
कल्लोलौ स्यादावर्तोंभसां भ्रमः पृषंति बिंदुपृषताः पुमांसो विप्रुषस्त्रि
यः ७ चक्राणि पुटभेदास्युर्भ्रमाश्च जलनिर्गमाः कूलं रोधश्च तीरं च
प्रतीरं च तटं त्रिषु ८ पारावारे परार्वाची तीरे पात्रं तदंतरं। द्वीपोस्त्रि
यामंतरीपं यदंतर्वारिणस्तटं ९ तोयोत्थितं तत्पुलिनं सैकतं सिकतामयं निषद्वरस्तु जंबालः पंकोस्त्री शादकर्दमौ १० जलोच्छ्वासाः परीवाहाः २५
कूपकास्तु विदारकाः। नाव्यं त्रिलिंगं नौतार्ये स्त्रियां नौस्तरणिस्तरिः ११

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(9A) उडुपंतुप्लवः कोलः स्रोतोंबुसरणंस्वतः ॥ आस्तरः स्तरपंण्यंस्याद्द्रोणीकांष्ठांबुवाहिनी
१२ सांयात्रिकः पोतवणिक्कर्णधारस्तुनाविकः नियामकाः पोतवाहाः कूपकोगुणा
वृक्षकः १३ नौकादंडक्षेपणिस्यादरित्रंकेनिपातकः अभ्रिस्त्रीकाष्ठकुद्दालः सेक
पात्रंतुसेचनं १४ यानपात्रंतुपोतो ऽब्धेर्मवित्रिषुसमुद्रियं सामुद्रिकोमनुष्योऽब्धि
र्नौतादौनौः समुद्रिका १५ कुबिर्धनावंनावोऽर्धेऽतीतनौकेतनुत्रिषु त्रिघागा
धात्प्रसन्नोछः कलुषोनछआविलः १६ निम्नंगम्भीरंगंभीरमुत्तानंतद्विपर्यये अगाध
मतलस्पर्शंकैवर्तेदाशधीवरौ १७ अनायः पुंसिजालंस्याछणसूत्रंपवित्रकं
मत्स्याधानीकुवेणीस्याद्बडिशंमत्स्यवेधनं १८ पृथुरोमाझषोमत्स्योभीनोवै
सारणोंडजः १९ विसारः शकुलीचाथगंडकः शकुलार्भकः १९ सहस्रदंष्ट्रः
पाठीनउल्लुपिशिशुकःसमौ नलमीनश्चिलचीमिः प्रोष्ठीतुशफरीद्वयोः २०

A joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(10)

अमरः

क्षुद्रांडोमत्स्यसंघातः पोताधानमथोझषाः रोहितोमद्गुरः शालोराजीवः शकुलस्ति
(१७) मिः २२ तिमिंगिलादयश्चाथयादांसिजलजंतवः तद्भेदाः शिशुमारोद्रशंकवोम
करादयः २२ स्यात्कुलीरः कर्कटकोकूर्मेकमठकछपौ ग्राहोवहारोनक्रस्तुकुं
भीरोथमहीलता २३ गंडूपदः किंचुलुकोनिहाकागोधिकासमे रक्तपातुज
लौकायांस्त्रियांभूम्निजलौकसः २४ मुक्तास्फोटःस्त्रियांशुक्तिःशंखस्यात्
कंबुरस्त्रियां क्षुद्र~~शंखस्या~~शंखाः शंखनखाः शंबूकाजलशुक्तयः २५
भेकेमंडूकवर्षाभूशालूरप्लवदर्दुराः शिलीगंडूपदीभेकीवर्षाभ्वीकमठी
डुलिः २६ मद्गुरस्यप्रियाशृंगीदुर्नामादीर्घकोशिका जलाशयोजलाधारा
स्तत्रागाधजलोह्रदः २७ आहावस्तुनिपानंस्यादुपकूपजलाशये पुंस्येवांधुः (१८)
प्रहीकूपःउदपानंतुपुंसिवा २८ नेमिस्त्रीकास्यवीनाहोमुखबंधनमस्ययत्

(10A)

पुष्करिण्यांतुखातंस्यादखातंदेवखातके २९ पद्माकरस्तडागोस्त्रीकासारःसरसी
सरः वेशंतः पल्वलंचाल्पसरोवापितुदीर्घिका ३० खेयंतुपरिखाधारःस्त्वंभसां
यत्रधारणंस्यादालवालमावालमावापोथनदीसरित् ३१ तरंगिणीशैवलि
नीतटिनीह्रादिनीधुनी स्रोतस्विनीद्वीपवतीस्रवंतीनिम्नगापगा ३२ गंगाविष्णुपदी
जन्हुतनयासुरनिम्नगा भागीरथीत्रिपथगात्रिस्रोताभिष्मसूरपि ३३ कूले
कषानिर्झरिणीरोधावक्रासरस्वती कालिंदीसूर्यतनयायमुनाशमनस्वसा ३४
रेवातुनर्मदासोमोद्भवामेकलकन्यका करतोयासदानीराबाहुदासैतवा
हिनी ३५ शुतद्रुस्तुशतद्रुस्याद्विपाशातुविपाट्स्त्रियां शोणोहिरण्यवाहस्या
त्कुल्यास्यात्कृत्रिमासरित् ३६ शरावतीवेत्रवतीचंद्रभागासरस्वती कावेरी
सरितोन्याश्चसंभेदःसिंधुसंगमः ३७ द्वयोःप्रणालीपयसःपदव्यांत्रिषुतूत्तरौ

Joint project of the Rajawade Samshodhan Mandal, Dhule and the Vasantrao Pratishthan, Mumbai

(11)

अमर० देविकायांसरय्वांचभवेदाविकसारवौ ३८ सौगंधिकंतुकल्हारंहल्लकंरक्तसं
१८ ध्यकं स्यादुत्पलंकुवलयमथनीलांबुजन्मच ३९ इंदीवरंचनीलेस्मिन्सितेकु
मुदकैरवे शालूकमेषांकंदस्याद्वारिपर्णीतुकुंभिका ४० जलनीलीतुसेवा
लंशैवालोथकुमुद्वती कुमुदिन्यांनलिन्यांतुबिसिनीपद्मिनीमुखाः ४१ वा
पुंसिपद्मंनलिनमरविंदमहोत्पलं सहस्रपत्रंकमलंशतपत्रंकुशेशयं ४२
पंकेरुहंतामरसंसारसंसरसीरुहं बिसप्रसूनराजीवपुष्करांभोरुहाणिच
४३ पुंडरीकंसितांभोजमथरक्तसरोरुहे रक्तोत्पलंकोकनदंनालोनालमथा
स्त्रियां ४४ मृणालंबिसमब्जादिकदंबेखंडमस्त्रियां करहाटःशिफा
कंदःकिंजल्कःकेसरोस्त्रियां ४५ संवर्तिकानवदलंबीजकोशोवराटिकः १८
इतिवारिवर्गः॥ उक्तंस्वर्व्योमदिक्कालधीशब्दादिसनाट्यकं पाता

(11A)

त्भोगीनरकंवारिचैषांचसंगतं १ इत्यमरसिंहकृतौ नामलिंगानुशासने
स्वरादिकांडप्रथमसांगएवसमर्थितः २ इत्यमरसिंहकृतौ प्रथमकांडः स
माः शुभंभवतु कृष्णार्पणमस्तु महालक्ष्म्यैनमः स्वार्थेपरोप
कारार्थं इदंपुस्तकं जोगळेकरपरशुरामस्यइदं रामचंद्रार्पणमस्तु

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(12)

अमरकोशसमाप्तः

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

## मूळ प्रत पाहण्यासाठी संपर्क

---


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**

राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)

**दूरध्वनी क्रमांक** (०२५६२) २३३८४८

**Email ID** : rajwademandaldhule@gmail.com